**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2024 SHISRRJ | Volume 7 | Issue 2
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# न्यायाभिमतकर्मत्वविमर्शः

***श्री मृत्युंजय तिवारी***

***सहायक आचार्य, संस्कृत विभाग, जवाहरलाल नेहरू स्मारक पी0 जी0 कॉलेज महाराजगंज उ0 प्र0***

**Article Info**

**Article History**
Received : 25 March 2024
Published : 05 April 2024

**Publication Issue :**
March-April-2024
Volume 7, Issue 2

**Page Number :** 71-75

शोधसारांशः- फलव्यापारयोः पृथक्शक्तिस्वीकारपक्षेऽपि न निस्तारः तथात्वेऽपि हि 'गमनं न स्पन्दः' इत्यादौ फलांशे शक्तिप्रमया स्पन्दभेदान्वयबोधसम्भवेन तादृशप्रयोगापत्तेर्दुर्वारत्वात्। इति चेन्न ? न, तद्विशेष्यक-वृत्तिज्ञान-जन्यतदुपस्थिति-जन्यतावच्छेदककोटयै तादृशोपस्थित्य-व्यवहितोत्तरत्वनिवेशनमावश्यकम्, विशिष्य तत्तत्पदमन्तर्भाव्यैव पदार्थोपस्थितेरेकैकविधबोध नानाहेतुताया व्यवस्थापितत्वाद् एकपदाधीन-तद्विशेष्यक-शाब्दबोधे पदान्तरवृत्ति-ज्ञानजन्य-तपुदपिस्थतेर्व्यभिचारस्य प्रकारान्तरेण वारणासम्भवात्। एवं धात्वर्थतावच्छेदकफले द्वितीयार्थान्वयबोधेऽपि क्षतिविरहः तत्रैतादृशकारणस्य व्यभिचाराप्रसक्तेरिति वदन्ति एवम्प्रकारेण नव्या वदन्ति।

मुख्यशब्दाः-आन्वीक्षिकी, कर्मणि,गुणे, धात्वर्थः इत्यादयः।

न्यायशब्दस्यार्थः नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति न्यायः, न्यायश्चेदं दर्शनमिति न्यायदर्शनम्। षडास्तिकदर्शनानामलंकारभूतमक्षपादप्रोक्तं शास्त्रं न्यायदर्शनं सर्वविद्यानां प्रदीपरूपेण वरीवर्ति । अतएवोक्तम् -

प्रदीपः सर्वशास्त्राणामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता ।।

अक्षपादापरनामधेयोमुनिः गौतमो गौतमीयन्यायशास्त्रस्य प्रथमः प्रवक्ता, तैरेवेयं विद्या सूत्रप्रणयनादिना विस्तारितेति सेयं न्यायविद्या गौतमकृतेति व्यवह्रियते । अनेन विवेचनेन द्वारायमर्थः सिद्ध्यति यत् यत्र क्वचन प्रमाणानां साहाय्येन अभिप्रेतस्यार्थस्य सिद्धिः क्रियते तत्र भवति न्यायशब्दस्य प्रयोगः। इममेवार्थमाश्रित्य न्यायदर्शनस्य कृते न्यायशास्त्रशब्दस्य प्रयोगः भवति।

अस्य न्यायशास्त्रस्यानेकानि नामानि सन्ति। तथाहि-आदौ अस्य शास्त्रस्य आन्वीक्षिकी विद्या नामासीत्। "प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणसान्वीक्षा तया वर्त्तते या सा आन्वीक्षिकी"। इति आन्वीक्षिकीशब्दस्यार्थः। इयमान्वीक्षिकी विद्यद्यैव कालान्तरे न्यायशास्त्रनाम्ना अथवा तर्कशास्त्रनाम्ना प्रख्याताऽभवत्। यतोऽस्य शास्त्रस्याध्ययनेन वादस्य कलाधिगता भवति, अतः इदं शास्त्रवादविद्याशब्देनाप्यभिधीयते। इदं प्रमाणशास्त्रमपि कथ्यते।

कर्मपदार्थविचारचर्चायाम् अनेके वादा दृष्टिपथमवतरन्ति। प्रस्तुतेऽस्मिन् निबन्धे नव्यन्यायदृष्ट्या विचारान् उपस्थापयामः। द्वितीयाविभक्तेरर्थं निरूपयन् व्युत्पत्तिमान् आचार्यो गदाधरो बदति यत् "कर्मणि द्वितीया" इत्यनुशासनात् कर्मत्वं द्वितीयार्थः, तत्र कर्मपदस्य धर्मपरत्वात् सप्तम्या वाचकत्वार्थकत्वात्। आशयोऽयमस्ति यद् द्वितीयार्थो यत् कर्मत्वं

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

वर्तते तत्र "कर्मणि द्वितीया" इति पाणिनिसूत्रमेव प्रमाणं वर्तते। सूत्रे कर्मपदं कर्मत्वपरम् अर्थात् धर्मपरको विद्यते। कर्मणीत्यत्र सप्तमी वाचकतार्थिका अस्ति, यथा हि 'गुणे शुक्लादयः पुंसि' इत्यादिष्वमरकोशीयवाक्येषु सप्तमी वाचकतार्थिका वर्तते, अर्थाद् गुणवाचकाः 'शुक्लादयः पुंसि' इत्यर्थो भवति। तथैव प्रकृतेऽपि कर्मत्ववाचकाद् द्वितीयेति "कर्मणि द्वितीया" इत्यस्यार्थः सञ्जायते। पुनरत्र शङ्का उदेति यत् सूत्रकारेण "कर्मणि द्वितीया" इति सूत्रमुक्तम्, न तु कर्मत्वे द्वितीयेति एतच्छङ्कासमाधानाय गदाधरेणोक्तम्- "कर्मणश्च न तथात्वं कर्मणि नामार्थस्य ग्रामादेरभेदान्वयसम्भवेऽपि धात्वर्थगमनादिना तदन्वयासम्भवाद् गौरवाच्च'। अर्थाद् द्वितीयायाः कर्मेत्यर्थः सम्भवितुं नार्हति कथमिति चेच्छ्रूयताम्- नामार्थस्य ग्रामादेः (कर्मणः) अभेदान्वयसम्भवेऽपि धात्वर्थ गमनादिनाऽन्वयोऽसम्भवः। कथञ्चित् स्वीकारे गौरवमागमिष्यति। यथा 'चैत्रो ग्रामं गच्छति' इत्यस्मिन् वाक्ये चैत्रपदाच्चैत्रस्योपस्थितिः, गम् धातुना व्यापारस्य (गमनस्य) एवम् आख्यातार्थकृतेर्वर्तमानकालस्योपस्थितिर्भवति। ग्रामपदाद् ग्रामस्य तथा अम् विभक्तेः कर्मण उपस्थितिर्भवति, तथा च चैत्रपदोत्तर 'सु' विभक्त्या एकत्वसङ्ख्याया उपस्थितिर्भवति।

अत्र ग्रामपदार्थस्याऽम्पदार्थकर्मणा सहान्वयो भवितुमर्हति, किन्तु धात्वर्थगमनादिना तु तदन्वयोऽसम्भवोऽस्ति। उपर्युक्तस्य वाक्यस्य शाब्दबोधस्त्वित्थम्- ग्रामवृत्तिकर्मतानिरूपक (ग्रामवृत्तिफलानुकूल) व्यापारानुकूलवर्तमान-कालिककृतिमानेकत्ववबाँश्चैत्रः" चेद् द्वितीयार्थः कर्मेति चोच्यते तदा ग्रामाभिन्नकर्म इत्यस्य गमनक्रियायाम् अन्वयो न सम्भवः। यदा 'स्ववृत्तिफलजनकत्व' सम्बन्धेन धात्वर्थगमनेऽन्वय उपपाद्यते। तदा अयं पक्षो गौरवमावहति। अतस्त्याज्योऽयं पक्षः, कर्मत्वमेव द्वितीयार्थः। अत्र कर्मत्वरूपार्थे नास्ति काचिद् आपत्तिः, कर्मत्वं तु फलरूपमेव, तथा च ग्रामस्य वृत्तित्वसम्बन्धेन फले, फलस्यानुकूलत्वसम्बन्धेन व्यापारेऽन्वयः, तथा च शाब्दबोधः-ग्रामवृत्तिफलानुकूलव्यापारानुकूलकृतिमाँश्चैत्रः, कर्मत्वञ्चात्र क्रियाजन्यफलशालित्वम्, तत्र च क्रिया धातुत एव लभ्यते। जन्यजनकभावस्य च विनैव पदार्थत्वं संसर्गमर्यादया भानं सम्भवतीति फलमात्रं कर्मप्रत्ययार्थः। अर्थात् क्रियाजन्यफलशालित्वमत्र "अनन्यलभ्यो हि शब्दार्थः" इति धिया क्रिया तु धातुतः लभ्या, फलव्यापारयोर्यो खलु जन्यजनकभावसंसर्गः स तु आकाङ्क्षाभास्योऽस्ति। अतः फलमात्रमेवावशिष्टं वर्तते। तस्मात् कारणादेव फलमात्रं द्वितीयार्थ आगच्छति। तात्पर्यमिदमस्ति कर्तृवाक्यस्य शाब्दबोधे क्रियायां फलस्य जनकत्वं भासितो भवति तद्यथा चैत्रो ग्रामं गच्छति, अस्य शाब्दबोधः-"ग्रामवृत्तिफलानुकूलव्यापारानुकूलकृतिमाँश्चैत्रः' अस्मिन् शाब्दबोधे जनकत्वं आकाङ्क्षाभास्यं वर्तते। एवं कर्मवाच्यस्थलीयवाक्ये क्रियाजन्यत्वं फले भासते, तद्यथा 'चैत्रेण ग्रामो गम्यते' अस्य शाब्दबोधः "चैत्र-समवेतकृतिजन्यफलशाली ग्रामः" अत्र फले व्यापारजन्यत्वं भासते। अतोऽयं निष्कर्षः फलमात्रं द्वितीयार्थ इति राद्धान्तः समुत्पन्नः।

ननु फलमपि धातुलभ्यम्, यतः "फलव्यापारयोर्धातुः" इति सिद्धान्तात् फलस्य धातुवाच्यत्वात् कथं द्वितीयार्थः। तदेव निबध्नाति श्रीमान् गदाधरः "न च संयोगविभागादिरूपफलमपि धातुलभ्यमेव-गमित्यजिप्रभृतीनां तदवच्छिन्नस्पन्दादिरू-पव्यापारवाचकत्वादिति वाच्यम्, व्यापारमात्रस्य धात्वर्थत्वात्। फलविशेषान्वयबोधे च धातुविशेषजन्यव्यापारोपस्थितेर्हेतुतया 'ग्रामं त्यजति' इत्यादौ धात्वर्थस्पन्दे ग्रामनिष्ठविभागजनकत्वमेव 'ग्रामं गच्छति' इत्यादौ च धात्वर्थस्पन्दे ग्रामनिष्ठसंयोगजनकत्वमेव प्रतीयते, न तु विपरीतम्। अस्य तात्पर्यमिदमस्ति-यत् संयोगावच्छिन्नव्यापारो गम्धातोरर्थः, विभागावच्छिन्नव्यापारः 'त्यज्' धातोरर्थो वर्तते।

तत् संयोगविभागादिरूपं फलं धातुलभ्यमेव। यथा 'चैत्रो ग्रामं गच्छति' इत्यत्र संयोगः फलं वर्तते । तथा च 'चैत्रो ग्रामं त्यजति' इत्यत्र विभागः फलमस्ति। अतः फलव्यापारौ धातुवाच्यौ विद्येते। ननु व्यापारमात्रमेव धात्वर्थः फलं द्वितीयार्थ इति चेन्न गमत्यज्धातूनां पर्यायतापत्तिः, उभाभ्याम् उपस्थापितो व्यापार एकैव तस्मात् पर्यायत्वमागच्छति। "पर्यायत्वन्नाम-भिन्न-भिन्न-आनुपूर्वीमत्वे सति समानार्थकत्वम्"। तस्माद् व्यापारमात्रमेव धात्वर्थो नास्ति' अपितु फलमपि धात्वर्थः किन्तु

सति पर्यायत्वे इष्यपत्तिः 'चैत्रो ग्रामं गच्छति" चैत्रो ग्रामं त्यजति' इति वाक्याभ्याम् किन्तु साब्दबोधापत्तिरिति चेन्न, फलविशेषान्वयबोधे च धातुविशेषजन्य - व्यापारोपस्थितेर्हेतुतया 'ग्रामं त्यजति' इत्यादौ धात्वर्थस्पन्दे ग्रामनिष्ठसंयोगजनकत्वमेव न तु तद्भिन्नम्। तस्माद् व्यापारो धात्वर्थः फलं द्वितीयार्थ इत्यागच्छति। आशयो इदमस्ति यत् "फलविशेषविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति धातुविशेष- प्रति त्यज्धातुजन्यव्यापारोपस्थितिः कारणम्। अत एव' ग्रामं त्यजति' इत्यत्र धात्वर्थ जन्यव्यापारोपस्थितिः कारणम्"। अतो ग्रामनिष्ठविभागविषयकशाब्दबुद्धित्वावच्छिन्नं व्यापारे ग्रामनिष्ठविभागजनकत्वमेव प्रतीयते। तथैव ग्रामनिष्ठसंयोगविषयकशाब्दबोधं प्रति गम्धातुजन्यव्यापारोपस्थितिः कारणम्। तस्मात् 'ग्रामं गच्छति' इत्यत्र धात्वर्थव्यापारे ग्रामनिष्ठसंयोगजनकत्वमेव प्रतीयते न तु तद्विपरीतम्। 'ग्रामं गच्छति' इत्यादिवच्च 'ग्रामं स्पन्दते' इत्यादयो न प्रयोगाः "द्वितीयादेर्गम्याद्युपस्थापितस्पन्दादावेव फलान्वयबोधकत्वात् स्पन्दिप्रभृत्युपस्थापिते तस्मिन् द्वितीयादिना फलान्वय-बोधजननाऽसम्भवात्" अत्र पूर्वप्रसङ्गस्यापरदृष्यन्तमाध्यमेनोपर्युक्तं पक्षं समर्थयति । तथाहि गम्धातोः स्पन्द्धातोश्च स्पन्दरूप (व्यापार) एवार्थ अस्ति तथापि ग्रामं गच्छतीतिवद् 'ग्रामं स्पन्दते' इत्ययं प्रयोगे न सम्भवति, तत्र द्वितीयादेर्गम्याद्युपस्थापिते स्पन्दादावेव फलान्वयबोधकत्वात्। येन केनचिदुपस्थापितयोरेवार्थयोः परस्परम् अन्वयः प्रतीयते तदा 'घटः कर्मत्वम्' इत्यस्मादपि कर्मत्वरूपार्थस्य प्रतीतिः प्रसक्ता भवति, सिद्धान्ते तु न भवति तथैव कृदादिसमानार्थकयद्धातूपस्थाप्यफलेऽन्वयसम्भवेन 'घटं करोति' इतिवद् 'घटं यतते' -इत्यादिप्रयोगप्रसक्तिरागच्छति। अतो ययोर्यादृशान्वयबोधे आकाङ्क्षा तदुपस्थापितयोरेव तादृशान्वयबोधः। इदमत्राशयो व्यापारमात्रस्यैव धात्वर्थत्वे घटं करोतीतिवद् 'घटं यतते', इति तथा 'ग्रामं गच्छति' इतिवत् 'ग्रामं स्पन्दते' प्रयोगापत्तिः, इति न, फलविशेषान्वयवोधं प्रति धातुविशेषजन्यव्यापारोपस्थितिः कारणम् इति। आकाङ्क्षायाः स्वीकाराद्। "न चाकाङ्क्षात्र समभिव्याहारः, समभिव्याहारस्तु यथा गम्धातुना वर्तते तथैव स्पन्द्धातुनाऽपि विद्यत इति वाच्यम्, यतो द्वितीयादेर्गम्यादिसमभिव्याहारस्यैव फलबलाद् अन्वयबोधौपयिकत्वमुपगम्यते न तु स्पन्दिप्रभृतिसमभिव्याहारस्येति न तस्याकाङ्क्षात्वम् अन्वयबोधौपयिकसमभि-व्याहरस्यैव तथात्वात्" अर्थात् 'ग्रामं स्पन्दते' अत्र ग्रामवृत्तिसंयोग- जनकत्वविशिष्टव्यापार-विषयकशाब्दबोधो नोदेति, तथा च 'ग्रामं गच्छति' इत्यत्र तादृक् शाब्दबोधो भवति अतः फलबलात् गम्धातुना सह द्वितीयादेः समभिव्याहारः कारणं भवति। तस्माद् अन्वयबोधौपयिकसमभिव्याहारस्यैवाकाङ्क्षात्त्वम्। अत एव समानार्थकत्वेऽपि गम्यादेरिव न स्पन्द्यादेः सकर्मकत्वव्यवहारः फलान्वित-व्यापारबोधकधातुत्वस्यैव तन्नियामकत्वात्। अर्थाद् गमिस्यन्दिधात्वोः समानार्थकत्वेऽपि गम्धातुवत् स्यन्दिधातोर्न सकर्मकत्वव्यवहारी भवति, फलान्वितव्यापारबोधकत्वं वर्तते, स्यन्दिधातौ तन्नास्ति । तस्मात् व्यापारमात्रमेव धात्वर्थ इति सुरक्षितः।

एवञ्च एतावद् गदाधराचार्येण प्राच्यमतं स्थापितम् "नव्यास्तु- संयोगादिरूपफलविशेषावच्छिन्नस्पन्दो गम्याद्यर्थः। तत्तद्धात्वर्थतावच्छेदकफल- शालित्वमेव तत्तद्धातुकर्मत्वं नातो गम्यादिकर्मत्वस्य पूर्वदेशादौ प्रसङ्गः। न वा स्पन्देः सकर्मकत्वम्-तत्र फलस्य धात्वर्थतानवच्छेदकत्वात्। एवं च धातोरेव फलविशेषलाभात् फलान्वयिनि वृत्तिरेव द्वितीयार्थः"। अर्थान्नव्यनैयायिकाः फलव्यापारौ धात्वर्थः, आख्यातार्थः कृतिरित्येवम् अभिवदन्ति, तन्नये संयोगादिरूपफलविशेषावच्छिन्नस्पन्दो गम्धात्वर्थो विद्यते, अत्र तत्तद्धात्वर्थतावच्छेदक फलशालित्वमेव तत्तद्धातुकर्मत्वमस्ति, अत एव गम्यादिकर्मत्वस्य प्रसक्तिः पूर्वदेशादौ नास्ति । फलस्य धात्वर्थतावच्छेकत्वाभावात् स्पन्देः सकर्मकत्वमपि नास्ति। एवं फलमपि धातुलभ्यं वर्तते, अतः फलान्वयिनि वृत्तिरेव द्वितीयार्थः। संयोगावच्छिन्नव्यापारो गम्धातोरर्थः, विभागावच्छिन्नव्यापारस्त्यज्धातोरर्थः, अवच्छिन्नत्वन्नाम विशिष्टत्वम्, केन सम्बन्धेनेति जिज्ञासायां जनकत्वसम्बन्धेनेति । व्यापारो धात्वर्थः, तत्र विशेषणं धात्वर्थतावच्छेदकं भवति, अत्र त्यजिगम्योर्व्यापारे जनकत्वसम्बन्धेन संयोगविभागौ (फले) विशेषत्वेन वर्तते। तस्मादुभयत्रापि भवति सकर्मत्वव्यवहारः। स्पन्दधात्वर्थो व्यापारमात्रमेव तस्मात् सकर्मकत्वव्यवहारो भवितुं नार्हति। एवं फलस्य धातुलभ्यत्वात् तत्र द्वितीयायाः

शक्तिर्नास्तीति । अतो वृत्तिरेव (आधयेता) द्वितीयार्थः । न च "कर्मणि द्वितीया" इत्यनुशासनविरोधस्तस्य कर्मणि फलनिष्ठाधेयत्वान्वयिनि प्रकृतितात्पर्ये तदुत्तरं द्वितीयेत्यर्थकत्वात् ।

उपसंहारः- अत्रायमाशयः- नव्यन्यायमतेऽप्यनुशासनविरोधो नास्ति, यतः 'कर्मणि' अर्थात् फलनिष्ठाधेयतायामन्वयो विवक्षितस्तदा भवति द्वितीया। एवम्प्रकारेणानुशासनमपि सङ्गच्छते। ननु फलनिष्ठाधेयत्वान्वयिनि प्रकृतितात्पर्ये तदुत्तरं द्वितीयेति -स्वीक्रियमाणे परम्परया शक्तिग्राहकत्वानुपपत्तिरिति वाच्यम्, अनादितात्पर्यग्रहसम्पादकत्वेन शक्तिग्राहकत्वसम्भवात्। एतावत् पर्यन्तं समायाति यत् फलव्यापारौ धात्वर्थः, द्वितीयार्थो वृत्तिः (आधेयत्वं) वर्तते। अग्रे पुनः शङ्का उदेति यत् फलस्य पदार्थैकदेशत्वाद् द्वितीयार्थवृत्तेरन्वयो न सम्भवति "पदार्थः पदार्थनान्वेति न तु पदार्थकदेशेन"। इति व्युत्पत्तिः स्वीकारात्, किन्तु व्युत्पत्तिवैचित्र्याद् अत्रान्वयः सम्भवति! वैचित्र्यन्नाम धात्वर्थातिरिक्तपदार्थः पदार्थनान्वेति न तु पदार्थकदेशेनेति नियमो धात्वर्थे तु भवत्येव पदार्थकदेशेऽन्वयः। पुनरत्र धात्वर्थकदेशे पदार्थान्तरस्यान्वयः स्वीक्रियमाणे आपत्तिः प्रस्तूयते "अथ गमनं न स्पन्द इत्यादितो धात्वर्थतावच्छेदकफले स्पन्दभेदान्वय-बोधसम्भवेनैतादृशप्रयोगस्य वारणाय फलविशेष्यकान्वयबोधे तद्विशेष्यकवृत्ति- ज्ञानजन्यफलोपस्थितित्वेन हेतुत्वकल्पनस्यावश्यकत्वात् तादृशकारणबाधेन धात्वर्थतावच्छेदकफले द्वितीयार्थान्वयासम्भवः।" उक्तरीया 'गमनं न स्पन्द' इति प्रयोगापत्तिः सिद्धान्ते तु नैष प्रयोगो भवति । एतद्वारणाय फलविशेष्यकान्वयबोधे तद्विशेष्यकवृत्तिज्ञानजन्यफलोपस्थितित्वेन हेतुत्वकल्पनस्यावश्यकत्वात् तादृशकारणबाधेन धात्वर्थतावच्छेदकफले द्वितीयार्थान्वयासम्भवोऽस्य ग्रन्थस्यायमभिप्रायो यत् नव्यमते फलावच्छिन्नव्यापारे धातोः शक्तिर्वर्तते, अतः फलावच्छिन्नव्यापारो धात्वर्थः। द्वितीयार्थ आधेयत्वम्, "पदार्थः पदार्थेनान्वेति न तु पदार्थकदेशेन' इति व्युत्पत्तिवैचित्र्याद् धात्वर्थैकदेशेऽप्यन्वयः सम्भवति, किन्तु 'गमनं न स्पन्दः' इत्यादिषु स्थलेषु धात्वर्थतावच्छेदकीभूतफले स्पन्दभेदान्वयः सम्भविष्यति, अत्र गमनपदार्थ उत्तरदेशसंयोगानुकूलस्पन्दात्मकव्यापारः, तथा च स्पन्दात्मकव्यापारः स्पन्दपदार्थः, यत उत्तरदेशसंयोगानुकूलस्पन्दात्मकव्यापारः स्पन्दव्यापारातिरिक्तो नास्ति, अपितु स्पन्दात्मकव्यापारादभिन्नैव। यथा 'नीलो घटः', घटादतिरिक्तं नास्ति, अपितु घटरूपात्मकमेव, अतएव गमनं स्पन्द एव न तु तद्भिन्नः। वस्तुत एवं विधप्रयोगा न भवन्ति। प्रस्तुते स्पन्दात्मकव्यापारस्य भेदो विद्यते अत एव उत्तरदेशसंयोग रूपधात्वर्थतावच्छेदके स्पन्दभेदान्वयः सम्भवः। तथा च यथा 'संयोगो न स्पन्दः' तथैव 'गमनं न स्पन्दः' इत्यापत्तिः। एतद्वारणाय 'फल विशेष्यकान्वयबोधत्वावच्छिन्नं प्रति फलविशेष्यकवृत्तिज्ञानजन्यफलोपरिस्थितित्वावच्छिन्नं कारणम्"। अत्र 'गमनं न स्पन्दः' इत्यत्र गमनपदात् संयोगानुकूलस्पन्दस्योपस्थितिर्भवति तत्र स्पन्दो विशेष्यं वर्तते। फलविशेष्यकवृत्तिज्ञानजन्यफलोपस्थितित्वाभावाच्छाब्दबोधो न भवति। तस्मात् 'गमनं न स्पन्दः' इति प्रयोगो नोपपद्यते। अस्मिन्नेव सन्दर्भ पुन आपत्तिं प्रस्तौति "न च यादृशपदसमभिव्याहारज्ञानात् फलविशेष्यस्पन्दभेदान्वयबोधः पदज्ञानजन्यफलाद्युपस्थितिघटित-प्रसिद्धस्तादृशपदसमभिव्याहारज्ञानतादृश गमनपदसमभिव्याहारतज्जन्यफलोप-सामग्र्यास्तादृशान्वयबोधोत्पादप्रयोजिकाया असत्त्वेनोक्तस्थले तदापत्त्यसम्भव इति वाच्यम्, यत्र गमनादिपदादेव लक्षणया शक्तिभ्रमेण वा स्वातन्त्र्येण फलोपस्थितिस्तत्र फलविशेष्यकस्पन्दाभेदान्वयप्रसिद्धया स्थितिघटितसामग्र्याः फलविशेष्यकस्पन्दत्वाद्यवच्छिन्न-भेदान्वय-बोधप्रयोजकताया आवश्यकत्वात् तद्बलेन शक्ति प्रमाधीनबोधेऽपि फलांशे स्पन्दभेदादिभानप्रसङ्गात् ।"

एवञ्च फलव्यापारयोः पृथक्शक्तिस्वीकारपक्षेऽपि न निस्तारः तथात्वेऽपि हि 'गमनं न स्पन्दः' इत्यादौ फलांशे शक्तिप्रमया स्पन्दभेदान्वयबोधसम्भवेन तादृशप्रयोगापत्तेर्दुर्वारत्वात्। इति चेन्न ? न, तद्विशेष्यक-वृत्तिज्ञान-जन्यतदुपस्थिति-जन्यतावच्छेदककोटयै तादृशोपस्थित्य-व्यवहितोत्तरत्वनिवेशनमावश्यकम्, विशिष्य तत्तत्पदमन्तर्भाव्यैव पदार्थोपस्थितेरेकैकविधबोध नानाहेतुताया व्यवस्थापितत्वाद् एकपदाधीन-तद्विशेष्यक-शाब्दबोधे पदान्तरवृत्ति-ज्ञानजन्य-

तपुदपिस्थतेर्व्यभिचारस्य प्रकारान्तरेण वारणासम्भवात्। एवं धात्वर्थतावच्छेदकफले द्वितीयार्थान्वयबोधेऽपि क्षतिविरहः तत्रैतादृशकारणस्य व्यभिचाराप्रसक्तेरिति वदन्ति एवम्प्रकारेण नव्या वदन्ति।

सन्दर्भग्रन्थसूचिः


1. प्रौढमनोरमा, अजन्त पुं.प्र.
2. व्यु.वा., पृ.सं. 209
3. व्यु.वा., पृ.सं.–210 (सं. सुदर्शनाचार्यः)
4. व्यु. वा., पृ.सं.210 (सं. सुदर्शनाचार्यः)
5. अ.को., 3/3/22
6. व्यु.वा., पृ.सं.211 (सं. सुदर्शनाचार्यः)
7. पा.सू., 2/3/2
8. व्युत्पत्तिवादः, पृ.सं. 207 (सं. सुदर्शनचार्यः)
9. वै.भू.सा., प्रभा टी. (प्र.का.)
10. वै.भू.सा, (द्वि.का.)
11. व्यु. वा., पृ.सं.208 (सं. सुदर्शनाचार्यः)